# Dayaananda sloka

## ॥ श्रीदयानन्दाष्टकम् ॥

सरस्वतीकृपापात्रं दयानन्दसरस्वतीम् ।
यतिश्रेष्ठगुरुं वन्दे दयार्द्राक्षं स्मिताननम् ॥ १

वेदान्तसारसद्बोधं लोकसेवनसुव्रतम् ।
दयानन्दगुरुं वन्दे दयार्द्राक्षकृपाकरम् ॥ २

गीतासारोपदेशं च गीतसत्कविताप्रियम् ।
दयानन्दगुरुं वन्दे दयाङ्कितसुभाषितम् ॥ ३

अद्वैतबोधकं वन्दे विशिष्टाद्वैतबोधकम्[1] ।
दयानन्दगुरुं वन्दे दयार्द्राननसान्त्वनम् ॥ ४

दयाकूटं तपस्कूटं विद्याकूटविराजकम् ।
दयानन्दगुरुं वन्दे दयादिसुगुणाश्रयम् ॥ ५

गङ्गातीरप्रबोधं च गङ्गापारतपस्स्थलम् ।
दयानन्दगुरुं वन्दे दयागङ्गास्रवास्रवम् ॥ ६

परमार्थगुरुं वन्दे तत्त्वबोधनतल्लजम् ।
श्रीदयानन्दशिष्यार्यं शान्तसत्त्वगुणास्पदम् ॥ ७

भारतश्रेष्ठरत्नं च सर्वलोकसुकीर्तितम् ।
दयानन्दगुरुं वन्दे अष्टकश्लोककीर्तितम् ॥ ८

*गीतस्तोत्रप्रमोदाय ज्ञानाचार्याय मङ्गलम् ।*
*वेदशास्त्रप्रवीणाय दयानन्दाय मङ्गलम् ॥*

*त्यागराजगुरुस्वामिशिष्यापुष्पाभिलेखनम् ।*
*दयानन्दगुरुस्तोत्रं पठनीयं शुभप्रदम् ॥*

– Smt. Pushpa Srivatsan